International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2024; 1(1): 01-05
© 2024 IJMH
www.themultijournal.com
Received: 21-02-2024
Accepted: 02-03-2024
Publish : 06-03-2024

**डॉ. कमलिनी पण्डा**
अध्यापिका, संस्कृतविभाग:,
मेघासन महाविद्यालय:,
नुदडिहा, ओड़िशा

**Correspondence:**
**डॉ. कमलिनी पण्डा**
अध्यापिका, संस्कृतविभाग:,
मेघासन महाविद्यालय:,
नुदडिहा, ओड़िशा

# श्रीरामलीलामृतकाव्ये ध्वनिविचार: एकं समीक्षणम्

**डॉ. कमलिनी पण्डा**

**Abstract:**

पण्डितमिश्रस्य लेखा: (काव्यम् , खण्डकाव्यम् , चम्पू:, तथा नाटकानि) च अहं पठितवत्यस्मि। तत्र खण्डकाव्येषु भक्तिभाववाहुल्यं मनोभावस्य नमनीयता तथा संपूर्णतया आत्मसमर्पणं परिलक्ष्यते। वैजयन्तीशतकम्, सारलाशतकम्, श्रीरामलीलामृतम् इत्यादौ तत् तद् देवतानां करुणाविलास: अनुभूयते। किन्तु वदनचन्द्रपञ्चाशिकायां भगवतोवदनसरोरुहस्य वर्णनच्छलेन भक्तान्तरभावनाराशि: तस्मिन् वदने समनुभूयते। मुरलिध्वनिसप्तत्या भगवतोवंशीवदनस्य मुरलीध्वनि: संपूर्णं विश्वं परिवाप्य योगिनां, भोगिनां, पापिनां, देवानां च मन:सु अपूर्वां कामपि प्रीतिं जनयति। येन समग्रविश्वं उद्वेलितं भवति। इन्द्राणि निजं विस्मरति। समुदायेन खण्डकाव्यानि भक्तिरसप्रभूतानि । समाजे सामाजिकानां मन: शोधनं मोदनं च विदधाति । अथ चम्पूकाव्यम् -: प्रसेनविजयचम्पू: नामकेकाव्ये कवे: चरमकुशलता परिलक्ष्यते। संपूर्णं संस्कृतजगत्यां मङ्गलाचरणेषु विविधदेवानां स्तुति: परिलक्ष्यते । अस्य काव्यस्य स्वातन्त्रियं यत् मातृभूमिवन्दना एव मङ्गलाचरणं भवति । ग्रन्थसमाप्तौ च जगन्नाथस्य भारतं प्रति आर्शीवाद: कृत: अस्मि । मध्ये राष्ट्रस्यहिताय व्यक्तीनां मङ्गलाय वहव: उपदेशा: निहिता: तथा राष्ट्रसङ्कटमोचनाय विविधा: उपाया: वर्णिता:। मन्ये एतत् काव्य राष्ट्रहिताय एव कवि: रचितवान्। नाटकेषु च सामाजिकचेतना, पारिवारिकवन्धनम् , आत्मपरिशीलनं व्यक्तिसचेतनता वाहुल्येन वर्णिता: भवन्ति। इत्येवं कवे: काव्यानि अधीत्य मया पण्डितमिश्रस्य लेखानां समीक्षात्मकम् अध्ययनम् इति नामक: गवेषणात्मक: प्रबन्ध: रच्यते।

**कविपरिचय:**

काव्यकलामंजुले उत्कलप्रदेशे विश्वनाथादि महाविद्यानमण्डलमण्डिते जयदेवकोमलकान्त-पदावलीलहरी वेल्लिते रायरामानन्दादिकविनां नाटकसंकुले अभिनवगीतगोविन्दसंगीतसुमधुरे श्रीजगन्नाथविलास-नृत्यनटिनांचरणकोमलसंपातसुललिते पूर्वाम्भोधिसुनीलनीरधौतचरणे महानदी, वैतरणी, ब्रह्मणी, ऋषिकुल्या, महेन्द्रतनया, सुवर्णरेखा, कोएल्, शंख, सरस्वती प्रभृतिभि: अनवरतं समन्तत: सुसेविते देवमाली, मलयगिरि, महेन्द्रगिरि, लङ्गुलि, कपिलाशादि निर्झरझर्झरीकृत-गिरिमण्डलमण्डिते विरजा, चर्च्चिका, सारला, मङ्गला, किचकेश्वरी , विमला, समलेश्वरी प्रभृतिमातृराजि विराजितेऽत्र। श्रीसारलापरिपालिते जगात्सिंहपुरमण्डले भातपडानाम ब्रह्मणशासने आधुनिकसंस्कृत-लेखालेखक-शिरमणि: महामहोपाध्यायपण्डितगोविन्दचन्द्रमिश्र: पण्डितपद्मनाभ-मिश्रशर्मण: सुपुत्र: महोनीयाया: श्रद्धामणीदेव्या: जठरात् (१०.०७.१९३५) दिवसे अष्टमसन्तानत्वेन स्वग्रामधरणी अमण्डयत्। श्रीरामलीलामृतम् काव्येऽस्मिन् राक्षसकवलिताया: धराया: प्रार्थनात आरभ्य पुष्पकयानेन सीतया लक्ष्मणेन च सह श्रीरामचनद्रस्य अयोध्यां प्रत्यागमनपर्यन्तं सुमधुरा श्रीरामलीला वर्णिता।

अस्मिन् लघुकाव्ये ११० पद्येषु प्रथमे पद्ये राक्षसानां भारणे पीडिता धरा मुक्त्यर्थम् आदिपुरुषं परमात्मानं श्रीरामरूपधारिणं दयासागरं विष्णुं प्रार्थयामास इति सूचितम् । श्रीराम दामोदर माधवेति इति

गोविद्दामोदरस्तत्रम् प्रत्येकं श्लोकस्य चतुर्थपाद: श्रीराम विष्णो करुणार्णवेति इति दृश्यते। भक्तानां श्रीरामचन्द्रेण सह सम्भाषणावसरे श्रीराम विष्णो करुणार्णवेति इति पदमस्ति। भगवत: श्रीरामचन्द्रस्य लौकिकीं लीलां स्मरन् भक्तकवि: भक्तिभावपूर्णम् आसीत् । पिता दशरथ: सुतं श्रीरामं करयो: गृहीत्वा कमनीयशेषं मुखमण्डलमवलोक्य तदवसरे दशरथ: स्वपूर्वजन्मवृत्तान्तं स्मृतवान् । क्षणेन तन्मयो भूत्वा शिशुं श्रीरामम् आलिंग्य श्रीराम विष्णो करुणार्णवेति आह । यथा

**मुहूर्त्तमप्युत्सहते मनो मे**
**न हातुमेतच्चरणारविन्दम् ।**
**गृहाण शस्त्रं कृपया मदर्थं**
**श्रीराम विष्णो करुणार्णवेति ।।९**

(श्रीरामलीलामृतम् . १०/पृ. ५४)

इति रावणोक्ति: अनवरतं मनो मे स्पृशति। एवं मदीया आसक्ति अस्य कवे: लेखासु बलवती संवृत्ता। तथा च मङ्गलाचरणे कवे: मङ्गलवाक्यं वर्णयति । यथा

**दीना धरा राक्षस भार मुक्त्यै**
**तप्तान्तरा वाष्प निरुद्ध नेत्रा ।**
**समाह्वयत् तं प्रथमं पुमांसं**
**श्रीराम विष्णो करुणार्णवेति ।।१०** (तत्रैव /०१/पृ.०५)

तथा च काव्येऽस्मिन् श्रीरामस्य त्रय: अनुजा: अपि परस्परं बाहुयुगं धरन्त: परित: भ्रमन्त: श्रीराम विष्णो करुणार्णवेति व्यनक्ति। यथा च श्लोकेऽस्मिन् कविप्रवर: वैर्दभी रीति: प्रयोग: कृतवान् ।

**ते भ्रतरो मीलितनेत्रपद्मा:**
**परस्परं बाहुयुगं धरन्त: ।**
**मुदा स्वजन्तोऽग्रजमाहुरुच्चै**
**श्रीराम विष्णो करुणार्णवेति ।।११** (तत्रैव /०६)

अत्र माधुर्य: व्यञ्जकवर्णं धरन्त: मुदन्त: आदि स्पष्टीकरोति । तथा कवे: उपजातिवृत्तेन अस्य एव पदं रचितम् । ब्रह्मर्षि विश्वामित्र: यदा राजसभान् आगत: तदा दशरथ: मुने: कृते प्रणाममं कथयत् । श्रीरामोऽपि ताताज्ञया मुनिं प्रणामं कृतवान् । अस्यार्थ: भवति श्रीरामं स्वयं सुरासीत् । तथापि तस्या कृते मुने: प्रति तस्य भक्तिभाव: कवि: अस्य काव्ये दृश्यते । गाधिसुत: ब्रह्मर्षि: विश्वामित्र: एतद् परं स्वहृदयेन तं जगदेकमाद्यं श्रीरामं नमन् श्रीराम विष्णो करुणार्णवेति आह ।

**नमन्तमीशं नवनीरदाभं**
**ताताज्ञया तं जगदेकमाद्यम् ।**
**हृदा नमन् गाधिसुतोऽप्यवोचत्**
**श्रीराम विष्णो करुणार्णवेति ।।१२** (तत्रैव /०७)

तत्र निर्जने कानने गुरु: श्रीरामाय जया , विजया च इति विद्याद्वयीं प्रायच्छत्। एकान्ते बहुदिनात् परं भववन्तं विलोक्य विश्वामित्र: प्रार्थयामास। श्रीरामवाणेन क्षतविक्षतशरीरा ताटका प्राणत्यागसमये राक्षसजीवनात् मुक्ति: हेतु: प्रभुं विलोक्य श्रीराम विष्णो करुणार्णवेति आह ।

**श्रीरामवाणावलि विद्धगात्रा**
**वमन्त्यद्धं रुधिरं विमुक्ता ।**
**सा ताटकाऽऽलोक्य हरिं जगाद**
**श्रीराम विष्णो करुणार्णवेति ।।१३** (तत्रैव /०९)

मुनयोऽपि आश्रमे श्रीरामं विलोक्य स्तुतिम् आह श्रीराम विष्णो करुणार्णवेति। तदा तत्र यज्ञकार्यमारब्धं राक्षसा: रामशराहता: स्वसौभाग्यमिति चिन्तितवन्त:। तत्र मारीच: रामवाणेन दक्षिणसागरे अपतत् । तस्य मोहभाव: दूरं गत: । अत: स भगवन्तं मुरारि इति ज्ञात्वा प्रार्थयामास। महर्षे: गौतमस्य धर्मपत्नी दु:खिनी अहल्या श्रीरामचन्द्रस्य चरणाम्बुजरेणुना पावित्रान्त: करणा: तीव्रतपस: विनिवृत्ता प्रेम्णा श्रीरामं प्रार्थितवती ।

श्रीरामलीलामृते काव्यतत्त्वानि

अस्मिन् शतककाव्ये इन्द्रवज्राा, उपेन्द्रवज्राा, उपजातिप्रभृतीनां छन्दसां प्रयोग: दृश्यते। शब्दार्थयो: स्वच्छतया प्रयोगत्वात् प्रसादगुण: काव्यसमग्रमभिव्याप्य तिष्ठति । कवे: श्रीरामविषयक: रतिभाव: प्राध्यान्येन अभिव्यक्त: इति ध्वनिवादिनां मतानुसारमत्र भावध्वनि: ध्वन्यते । भक्तिरसवादिनां मतानुसारं तु भक्तिरस: एवात्र भक्तान् सहृदयान् आह्लादयत्वेन । रामकथा अनन्ता इति तत्त्वज्ञा: वदन्ति । आचन्द्रार्किं पवित्रकथेयं लोकेषु प्रचरिष्यति इति ।

काव्येऽस्मिन् विशेषत: उपमा, रूपक, दृष्टान्त, स्मरणालङ्काराणां सौन्दर्यमाकलयितुं शक्यते। कवे: हृदयं श्रीरामभक्तिरसाप्लुतामस्ति । तस्मात् माधुर्यगुणव्यंजिकारचनेयं समकालिककविकृतिषु मधुररसं व्यंजयद् जयतितरामिति ।

साधारणत: शब्देभ्य: कोषव्याकरणादिभि: तथा लोकव्यवहारेण च निर्द्दिष्ट: अर्थ: यया वोद्दते सा अभिधा: । अभिधाया: अर्थ: मुख्य प्रयोजनरूप कारणद्वोयेन कदाचिद सम्बधिनं अन्यं अर्थं वोधयति। सेयं द्विआर्थ प्रभृति वुद्दि: लक्षणा । यथा -

**'गङ्गायां घोष:"।** (साहित्यपर्दण: पृ/७८)

अभिधाया: अर्थस्य अर्थात् व्याच्यार्थस्य वोधनानन्तरम् शब्दे यदि अर्थ प्रचुर्यम् विद्यते सोऽयम् अर्थ: ।

**वक्तृबोद्द्व्यवाक्यानामन्यसंनिधिवाच्ययो: ।**
**प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ।।**

(साहित्यदर्पण: ३/२६)

काव्यस्य शब्दार्थशरीरं, रसादिवत् आत्मा, अवयसंस्थानवत् रीतय:, गुणा शौर्यादिवत्, अलंकाराश्च कण्टककुण्डलादिवत् इति विश्वनाथेन कथितम्। तत्र रसभावाद्वोय: सर्वे ध्वनिना व्यक्ता: भवन्ति। शब्दार्थ: शब्दस्य अभिधया प्रथमार्थ: वोध्यते इति अभिधा: प्रथमावृत्ति:। तस्या वाधे सती गौणी वृत्ति: लक्षणा समेति।

**वीरतासअभिधयासु ययार्थवोध्यतेऽपर:।**
**सावृर्त्ति व्यञ्जनानाम शव्दस्यार्थादिकस्य च ।।**

(साहित्यदर्पण:०२/०२)

अत्र आदि पदेन प्रत्ययादिनामपि व्यञ्जकता सुच्यते। व्यञ्जनया व्यक्त: अर्थ: ध्वनिनाम्नाऽपि गृह्यते । ध्वनिस्तु रसध्वनि: वस्तुध्वनि: अलंङ्कारध्वनिश्चेति त्रिधा भवति। साधारण: अर्थमात्रध्वनि: वस्तुध्वनि:। तत्र अर्थे यदि अलंङ्कारसार्मथ्यं भवति तदा अलंङ्कारध्वनि:। यदि तत्र रस: शृङ्गारोऽदिकऽनुभूयते स रसध्वनि:। रस: कदापि अभिधालक्षणाभ्याम् परिवेशयितुं न शक्यते । अथ श्रीरामलीलामृते ध्वनिविचार: प्रारभ्यते ।

**श्रीरामलीलामृते ध्वनिविचार:**

**दीना धरा राक्षस भार मुक्त्यै**
**तप्तान्तरा वाष्प निरुद्ध नेत्रा ।**
**समाह्वयत् तं प्रथमंपुमांसम्**
**श्रीराम विष्णो करुणार्णवेति ।।**

(श्रीरामलीलामृतम् ०१/पृ१०)

दिनाधरराराक्षसमुक्तै अत्र श्लोके राक्षसानाम् घोरेण उत्पातेन पृथीवि कान्ता वाष्पनिरुद्ध: नेत्रा। वाष्पै लोतकै निरुद्धं नेत्र यस्या सा। प्रथमं पुमांस विश्वस्य आद्यं पुरुषं समाह्वयत् । राक्षसानां उत्पात: एवं भयंकर: आसीत् । येन सर्वं सहामपि धरणी दिना सती अक्रन्दत्।

अत्र दिना इति पदध्वनि: अनन्यगतिका सती विश्वाद्यं विश्ववद्यम् आहुय समाश्रितवन्ति । दिना पदेन दु:खस्य गाढत्वं ध्वन्यते इति पदध्वनि: । प्रायश: दु:खेषु कन्यका पितरमाश्रयन्ते ।

अत्र विश्वाद्य: भगवान् विष्णु: धरण्या: पितृस्वरूप: तथा धरा च कन्यका आस्तान् । समाह्ययत् इति पदेन एष सम्बन्ध: ध्वनित: इत्यपि पदध्वनि: ।

**तातो गृहीत्वा करयो: सुतं स्वं**
**निरीक्ष्य वक्तत्रं कमनीयशेषम् ।**
**आह प्रसन्न: स्मृत पूर्व पुण्य:**
**श्रीराम विष्णो करुणार्णवेति** ।। (श्रीरामलीलामृते /०५/पृ११)

अत्र तात दशरथ: शिशुं श्रीरामं करयो: उत्तल्य अङ्के धरन् तस्य सुन्दरादपि सुन्दरतमं वदनं विलोक्य श्रुतपूर्वपूर्ण्य सन् श्रीरामविष्णोकरुणार्णव इति आह ।

अत्र पिता: सन्तानम् उत्सङ्गे घृणन् मोदेत किन्तु दशरथ: श्रीरामं वदनं विलोक्य पुत्रेष्टियज्ञ तथा श्रवणकुमार वधं च चिन्तयन् अन्धमुनि दत्तम् अभिशाप भावयन् विकल: प्रसन्न: अपि श्रीरामविष्णोकरुणार्णव इति आह ।

अत्र प्रसन्नोऽपि श्रुतपूर्वपूर्ण्य: अर्थात् दशरथ: वैचित्यय मया बहुनि सु कृतानि । किमु अन्धमुनि: अभिशापं लघुकर्त्तुं इतानि पूण्यानि न सर्मथानि चेत् पुन: भगवन्त: स्मरामि इति श्रीरामविष्णोकरुणार्णव जगाद ।

अत्र शब्दगत: श्रुतपूर्वपूण्यं इति पदात् दशरथस्य प्रमोद परिस्थितौ अपि स्मृति: शंकान् व्यनक्ति । पुन: अन्धमुनि अभिशाप: कदाचित् फलेत् इति शंकया शोकस्य छाया अपि रसध्वनिना ध्वन्यते। येन भीतौ दशरथ: पुर्न विष्णु तुष्टाव । पुत्राह्लादकरुणस्थले कातरेण इश्वरस्वननं इति कातरताया हेतु: वस्तुध्वनि: ।

**ते भ्रतरो मीलितनेत्रपद्मा:**
**परस्परं बाहुयुगं धरन्त: ।**
**मुदा स्वजन्तोऽग्रजमाहुरुच्चै**
**श्रीराम विष्णो करुणार्णवेति** ।। (तत्रैव /०६/पृ.१२)

अर्थात् साकेत राजभवने चत्वारभ्रतर: परस्पर बाहुवन्धनेन सन्त: आनन्देन आलिङ्गिता: अपि अग्रजं श्रीरामविष्णुकरुणार्णवेति उच्चै: आहु। आलिङ्गनवध्या अपि अग्रजं उच्चस्वरेण श्रीरामविष्णु-करुणार्णवेति स्तुतवन्त:। आलिङ्गिता अपि त्रयो भ्रतर: न वयं भवत: समाना: भवान् करुणार्णव: इति अवदन् ।

अत्र मुदा स्वजन्त: अपि अग्रजं स्तुतवन्त: । हे करुणार्णव ! अत्र अग्रज आहु पदद्वोयात् भ्रतृणाम् असमानयता तथा श्रीरामे गाढाभक्ति: सुच्यते इति पदेऽथ वस्तुध्वनि: । मुदा स्वजन्त: अपि इति अत्र अपि पदेन भ्रतृणाम् अवरता न समानता ध्वन्यते ।

**नमन्तमीशं नवनीरदाभं**
**ताताज्ञया तं जगदेकमाद्यम् ।**
**हृदा नमन् गाधिसुतोऽप्यवोचत्**
**श्रीराम विष्णो करुणार्णवेति** ।। (तत्रैव ०७/पृ . १२)

नवजलधरश्यामल: वालकश्रीराम: यदा गाधीसुतं तातस्य आज्ञया अनुमत् तद् गत चित्तौ भगवान् विश्वामित्र: मनसा प्रणमन् । मनसा एव श्रीरामविष्णुकरुणार्णव इति अवोचत् ।

अत्र मुनिश्रेष्ठं पूज्य इति राम: अनमत् मुनिश्रेष्ठं च परमपुरुषं भगवन्तं मूत्तिमन्तं स नयनाभ्यां पश्यं कृत्रार्थ सन् प्राणमत् ताताज्ञया इति पदेन राम: स्वयं स्व भक्तं न अनमत् । तात आदिष्टवान् इति तातादेश: पालनं एव कृतवान् इति पदध्वनि: । गाधीसुत: हृदानमन् अवचत् इति विश्वामित्र अपि भगवत: परमेश्वरस्य प्रणाम ग्रहणाय आत्मान: संकुचितं मेने इति ताताज्ञा पदध्वनि: । जगदेकमाद्यं इति अत्र आद्यं इति पदं यतो न कश्चित् वर्षीयान् अस्ति। महान् वा अस्ति, प्रणामयोग्य वा अस्ति इति सुच्यते ।

**तस्मै च विद्ये विजयाजयाख्ये**
**दर्दुरुर्गाधिसुत: पुनस्तम् ।**
**भक्त्याऽऽह्वयन्निर्जनकाननान्त:**
**श्रीराम विष्णो करुणार्णवेति ।।** (तत्रैव/०८/पृ.१३)

विश्वामित्र: विजयाजयाक्षे दिव्ये ददान:। नीर्जनकानननान्त: भक्त्या आह्वयत् इति अत्र निर्जन शब्दस्य ध्वनिना भगवान् विश्वामित्र: श्रीराम: एकान्ते हे श्रीराम: ! हे विष्णु ! हे करुणार्णव इति स्तुतवान् । सर्वत्र जनसमागमात् स सरलप्राणत्वया रामं न किंतु समर्थ: आसीत् इति व्यज्यते । सर्वमेव श्लोके वस्तुध्वनि: विद्यन्ते ।

**सा दु:खिनी गौतम धर्मपत्नी**
**श्रीरामपादाम्बुजरेणुसिक्ता ।**
**प्रेमणाऽऽह्वत् तीव्रतपोनिवृत्ता**
**श्रीराम विण्षो करुणार्णवेति ।।**

(श्रीरामलीलामृतम् १२/पृ१५)

गौतमधर्मपत्नीअहल्या श्रीरामपादाम्बुजं रेणुसिक्ता सती तीव्रतपोनिवृत्ता तम् आह्वयत् ।

अत्र तीव्रतोपनिवृत्ता सती सा दु:खिनी इति सामञ्जस्यं न घटते। दु:खिनी इति पदस्य ध्वनिना पाषाणं शरीरात् विमुक्ता अपि गौतमस्य श्रद्धायां सन्देहवती इति ध्वन्यते। येन श्रीरामविष्णो-करुणार्णवेति इति सा संप्राथ्य गौतमप्रेम याचते स्म। गौतमप्रेम्णी संशय इति दु:खिनी पदाथौ संशयमापर्णां इति ध्वन्यते।

**रथं निवर्त्याकुलनेत्रयुग्मो**
**दोर्भ्यां सुमन्तो नयने पिधाय ।**
**चुक्रोश निर्वाग् रघुनन्दनं तं**
**श्रीराम विष्णो करुणार्णवेति ।।** (तत्रैव /२८ पृ.२३)

सुमन्त: गंगातटत: शून्यरथं निर्वत्य नयनेविधाय: नीर्वाक् सन् तं रघुनन्दनं श्रीरामविष्णोकरुणार्णवेति चुक्रुश ।

अत्र आकुलनेत्रयुग्म इति पदेन तस्यान्तरे महतिव्यथा व्यक्ता। पाणिभ्यां नयनेविधाय इति पदेन स चिन्तितवान् अहं गत्वा राजधान्यां जनान् कथं मुखं दर्शयीष्यामि अथवा राजा अहं कथंचित् वोधयित्वा रामं प्रत्यानेश्यामि इति मयि विश्वस्यं राजानां वा इमं दग्धवदनं कथं दर्शयिष्यामि इति ध्वन्यते । स नीर्वाक् तं रगुन्द्दनं चुक्रुश अर्थात् आत्मनी अपि तस्य विश्वास: आसीत् । यत् अहं रामं प्रत्यानेतुं क्षमे । किन्तु तत् न जातम् । अत: स रामं हताश: चुक्रुश । राम चुक्रुश इति पदद्वोयस्य ध्वनि: भवति हा राम मम आशाम् त्वं निरस्तवान् इति वस्तुध्वनि: ।

**आलोक्य रामं वनवेदिकायां**
**कट्यां वसानं तरुचीरखण्डम् ।**
**कैकेयिकाऽक्रोशदतीव दीना**
**श्रीराम विष्णो करुणार्णवेति ।।** (तत्रैव /३८ पृ.२८)

रामं प्रत्यानेतुं गतवतां जनानां मध्ये कैकेयी गतवती । सा अपश्यत् वनवेदिकायां पुत्रकुटीरसम्मुखभागे मूर्त्तिकावेदिकायां राम: ववकलं वसान: वसति । अतीवदिना कैकेयी अकृशत् ।

अत्र अतीवदिना इति पदं यत् सर्वं घटति अघटत् सर्वं मम कर्मणं फलमेव इति अनुशोचना तस्यान्तरे भवति इति ध्वनि: । अन्यथा भरतस्य मातु: क्रदनकारणं नास्ति इति वस्तुध्वनि:। यत् घटितम् अर्थात् दशरथ मृत्यवे अपि अहं कारणं येन अद्य अहं विधवा इति च करुणरसान्वित: रसध्वनि:।

**गुरुर्वभाषे स्थितधीर्मुनिस्तं**
**यद् वेदितव्यं भगवान् हि वेद ।**
**तथापि वच्मित्वदधीनवृत्ति:**
**श्रीराम विष्णो करुणार्णवस्त्वम् ।।** (तत्रैव/४३/पृ.३०)

स्थितधी: मुनि: वशिष्ठ: रामं वभासे यत् वेदितव्यं भगवान् हि वेद:। तथापि तद्हीनवृत्ति: वच्मि ।

अत्र यत् वेदितव्यम् अर्थात् दशरथवियोग त्वाम् नेतुम् अत्र भरतादिनाम् आगमनं सर्वं किञ्चित् सर्वज्ञो भवान् जानाति । तथापि राजपुरोहितत्वेन अहं वच्मि। अत्र भगवन् इति सम्बोधनपदेन सर्व घटना ज्ञातृत्वं रामस्य दशरथ: कथयति । अहं तु चर्वितचर्वणं इव एतत् सर्वं द्विवार वदिष्यामि । अत्र ,

**वक्तृवोधव्यवाच्यानाम् अन्यसन्निधवाच्ययो**
**प्रस्तावदेशकालानां काकुचेष्टादिकस्य च ।**
**वैशिष्ट्यात् अन्यमर्थं या वोधयेत् स्वार्थसम्भवा ।।**

(साहित्यदर्पण: ०३/२६)

अत्र वक्ता महामुनिवशिष्ठ: । श्रोता च श्रीरामचनद्र:। भगवान् इति पदं वशिष्ठ: रामं व्यक्ति: प्रस्ताव अयोध्यापरिवेश:। तत: आर्थध्वनिना त्वयि पुन: किंचित् कथयन् अनावश्यकं इति ध्वन्यते।

**त्वत्पादसेवा विधिना हृता चेत्**
**समर्प्यतां मे शुभपादुका ते ।**
**तरामि राज्यार्णवमर्च्चयित्वा**
**श्रीराम विष्णो करुणार्णवस्त्वम् ।।** (तत्रैव/४९ पृ./३३)

विधि: तव पादसेवां मम हृतवान् । अस्तु मह्यं ते शुभपादुका सर्मप्यत। ये अर्चयित्वा अहं राज्यानवतरामि ।

अत्र वक्ता परमभक्तो भरत: श्रोता च भरतस्य परमइष्ट:। तेन राज्यम् अर्णव: अर्चयित्वा त्वरामि इति राज्ये अर्णवत्वारूप:। अर्चयित्वा अर्णवस्य प्रतरणं इति पादुकायां ध्वनिना त्वरीत्वारूप: इति परम्परित रूपकध्वनि: । तं करुणार्णव: त्वमेव विष्णु: अतेव विधिनां हृतां मे भाग्यात् पादसेवां पुन: परिवर्त्तयितुं अरहसि इति अर्थापत्ति: ध्वनि: अलंङ्कार:।

## उपसंहार:

कविगोविन्दचन्द्रमिश्रस्य काव्यकवितासु प्रायशो वाहुल्येन भक्तिभावना परिपुष्टा विद्यते । 'वैजयन्ती शतकम्" त: आरम्भात् 'सारलाशतकम्" यावत् भक्तिभावस्य व्यङ्जना प्रकटिता। भक्तिजीवने सर्वं किमपि सूक्ष्मतया वर्णनं ' वैजयन्ती शतकम्"काव्ये दृश्यते। शरीरस्पर्शरोमाश्च स्नानागारात् समुद्रं यावत् चेति: अनुसरति। नारदभक्तिसूत्रे भक्तिस्वरूपमतीव स्पष्टतया प्रकटितम्। भगवति भक्तिरेव जीवनस्य परमप्रेम स्वरूपं भवति। सां अमृतस्वरूपा। (नारदीयभक्तिसूत्र) तत् प्रेम प्रकर्षं लब्धा मनुष्य: सिद्ध: अमृत: तृप्तश्च भवति।

गोविन्दचन्द्रपंचाशिकाकाव्ये भक्तिनां आर्जवप्रीतिं वर्णयन् कवि: महता प्रयत्नेन प्रणय दु:खतातप्तं हृदयं कण्टकविद्धमिव अनुमाति। प्रणये सुकुमारता आवश्यकी योग्यता च नितरां प्रयोजनवती। संसारस्य कोलाहले यन्त्रणादग्ध हृदयस्य तथा मनुष्यमान्दोली करोति । विज्ञतयां सत्यमपि अवहेलित: सन् अविदुष: जयगाथां श्रुत्वा स्तब्धायते वुद्ध:। अधुनिकसमाजे स्वजनानां सन्निधौ स्थित्वाऽपि मनुष्य: सम्पर्काच्छिन्न: सन् शून्यतां भजते ।

## सहायकग्रन्थसूची

ग्रन्थनाम / लेखक: / व्याख्याकार: /संपादक:/ प्रकाशक:/ स्थानम्/ संस्करणं/ वर्षम्

१. नाट्यशास्त्रम्/भरतमुनि:/ अभिनवभारती/ नागर रविशंकर/ परिमल पब्लिकेशनस्/दिल्ली/चत्तुर्थ संस्करणम्/२०१२

२. साहित्यदर्पण:/कविराज:विश्वनाथ/शास्त्रीकृष्णमोहन:/लक्ष्मीटीका/चाखम्बा संस्कृतसंस्थान/वाराणसि/द्वितीयसंस्करणम्/२०१५ ।

३. मुरलीध्वनिसप्तति:/मिश्र:गोविन्दचन्द्र/प्रज्ञाप्रकाश:/कटकम्/प्रथमसंस्करणम्/२००६ ।

४. बरंकन्या/मिश्र:गोविन्दचन्द्र/ ओडिशासंस्कृतएकाडेमी/ भुवनेश्वरम्/ द्वितीयसंस्करणम्/२००८ ।

५. वदनचन्द्रपंचाशिका:/मिश्र:गोविन्दचन्द्र/भारतीवुक्स्टोर/भुवनेश्वरम्/ प्रथमसंस्करणम्/१९९९ ।

६. वैजयन्तीशतकम्/मिश्र:गोविन्दचन्द्र/प्रज्ञाप्रकाश:/कटकम्/प्रथमसंस्करणम्/२००२।

७. श्रीरामलीलामृतम्/मिश्र:गोविन्दचन्द्र/प्रज्ञालिपि/ जारका/याजपुरम्/ प्रथमसंस्करणम्/१९८६।

८. श्री सारला शतकम्/मिश्र: गोविन्दचन्द्र/साइ जगन्नाथप्रिण्ट्/ कटकम्/प्रथमसंस्करणम् /२०१८ ।

९. प्रसेनविजयचम्पू:/मिश्र:गोविन्दचन्द्र:/वैदिकपुस्तकालय/पुरी/प्रथमसंस्करणम्/२०१८ ।